International Journal of Sanskrit Research 2021; 7(4): 180-182

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 180-182
© 2021 IJSR
www.anantaajournal.com
Received: 27-05-2021
Accepted: 29-06-2021

**परमेश्वरः**
शोधच्छात्रः राष्ट्रिय संस्कृत विश्वविद्यालयः तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**परमेश्वरः**
शोधच्छात्रः राष्ट्रिय संस्कृत विश्वविद्यालयः तिरुपतिः, आंध्र प्रदेश, भारत

# रामायणे राष्ट्रियैक्यस्य प्रमुखतत्त्वानां विचारः

**परमेश्वरः**

**सारांशः**

आदिकविवाल्मीकिविरचिते रामायणे पुरुषोत्तमरामस्य मुखात् ये शब्दाः निःसृताः ते च शब्दाः अद्यापि समस्तभारतीयजनमानसे देशप्रेमभावनां जागरयन्ति इति निश्चप्रचम् । यथा - जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । इत्यनेन वाक्येन ज्ञायते यत् वाल्मीकिरचितं रामायणमेतातादृशमेकं महाकाव्यं भवति, यच्च महाकाव्यं राष्ट्रियैकतार्थं, देशवासीनां हितार्थं, तेषां स्वाभिमानगौरवार्थं प्रेरणामुत्साहं च प्रददाति । अतः रामायणे राष्ट्रस्य राष्ट्रियैकता स्वरूपमित्थमेवासीत् । अत्र राष्ट्रियैकता मुख्यतः एका भावात्मिकाशक्तिः वर्तते । वस्तुत: इयम् एका सामुदायिकी भावना भवति । या च भावना देशस्य नागरिकाणां मनसि विकसिता भवति। यदा केषामपि राष्ट्राणामुत अन्यदेशानां नागरिका: पारस्परिकरूपेण एकत्वभावनामनुभवन्ति। सुखदुःखेषु एकः अपरस्य कर्मणि साहाय्यमाचरन्ति तथा राष्ट्रहिताय स्वस्य सर्वस्वं दानं कर्तुं तत्पराः भवन्ति । तदा तेषु वास्तविकतायाः राष्ट्रियैकतायाः भावः दृष्टिगोचरो भवति । वाल्मीकि रामायणे प्रत्येकस्मिन् स्थाने राष्ट्रियैकतायाः भावः दरीदृश्यते । अतः रामायणकाले राष्ट्रियैकतां सम्पादयितुं राष्ट्रियैकतायाः तत्त्वानां प्राधान्यं दरिदृश्यते ।

**प्रधानसंसूचकानि:** राष्ट्रम्, राष्ट्रियैकता, भौगोलिकैकता, भावात्मकैकता, सांस्कृत्यैकता, राजनैतिकसाम्यता

## उपोद्घातः

रामस्य अयनमिति रामायणपदमिति विग्रहवाक्यबोधः। रामेण दर्शितो मार्ग इत्यर्थः। इदं रामायणं चतुर्विंशतिसाहस्रीसंहिता इत्यपि प्रख्यातम् । रामायणमिदं बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्ध्याकाण्डम्, सुन्दरकाण्डम् युद्धकाण्डम्, उत्तरकाण्डमिति च सप्तकाण्डैः विलसति । इदं रामायणमादिकाव्यमिति वाल्मीकिश्च आदिकविरिति च प्रसिद्धिं गतौ । रामस्यैव काले समुद्भता रामायणकथा सुधा इव सर्वान् सम्मोहयन्ती अद्यापि विराजते । लौकिकवाङ्मये इदं रामायणमेव प्रथममिति रामायणमेव साक्ष्यमस्ति । अस्मिन् भारतवर्षे विविधता दृश्यते ।

यदि एतस्याः विविधतायाः कारणविषये विचार्यते तर्हि ज्ञातुं शक्यते यत्कानिचन एतादृशानि तत्त्वानि विद्यन्ते यानि च - तत्त्वानि राष्ट्रमेकतासुत्रे बध्नातुं प्रयतमाना वर्तन्ते । रामायणकालिनराष्ट्रियैकतायाः अमुनि तत्त्वानि प्रमुखानि भवन्ति । यथा-

**मुख्यांशाः**

**भौगोलिकैकता**

भौगोलिकता एकस्य राष्ट्रस्य निर्माणे आधार इति मन्यते । एतया भौगोलिकैकतां विना राष्ट्रनिर्माणकल्पना असम्भवा भवति इति । अतः देशस्य भौगोलिकावधारणा राष्ट्रियैकतायाः आवश्यकसाधनं भाति । मन्दाकिनीनद्यः मनोरमचित्रं दृष्ट्वा रामस्य इदं कथनं यत्-

त्वं पौरजनवद् व्यलानयोथ्यामिव पर्वतम् ।
मन्यस्य वनिते नित्यं सरयुवदिमां नदीम्॥
(वा. रा 2/95/15)

**भावात्मकैकता**

देशस्य लोकेषु भावात्मकस्तरे एकता एव भावात्मकैकता इत्युच्यते । इयञ्च राष्ट्रियैकतायाः अनिवार्याङ्गस्वरूपा भवति । रामायणे अनेकेषु स्थलेषु भावात्मकैकतायाः विकासाय स्पष्टमुदाहरणं समुपलभ्यते । यथा- रामसुग्रीवयोः मैत्र्योः नरवानरौ अपि तु दाक्षिणात्यातरापथयोः गङ्गानर्मदयोः च सङ्गमः भवति । नरवानरयोः यद्यपि जातिगतभिन्नता दृश्यते तथाऽपि तत्र सांस्कृतिकैकता वर्तते एव ।

एवमेकान्त सम्पृक्तौ ततस्तौ नरवानरौ ।
उडाबन्योन्यसदृशं सुखं दुःखमभाषताम् ॥
(वा. रा 4/7/24)

**सांस्कृत्यैकता**

विदितचरमस्ति यत्- भारतस्य प्रतीष्ठे द्वे संस्कृतं संस्कृतिस्तथा । समाजस्य राष्ट्रस्य वा मूलधारा संस्कृतिः भवति । रामायणकाले नारीणां स्थानं महत्वपूर्णम् आसीत् । अस्मात् रामः नारीणां सुरक्षार्थम् अङ्गदःदुतरुपेण रावणं प्रति प्रेषयामास, तथा च उक्तवान् - आर्यसंस्कृतिः आर्यसंस्कृतिः एव । इमामेव संस्कृतिं देव-गन्धर्व-यक्षादयः सर्वे पुजयन्ति । अतः ये राक्षसाः इमां संस्कृतिं विरोधयन्ति तान् राक्षसान् समुलं उत्पाटयतु । तथा आर्यसंस्कृतिं प्रतिष्ठापयत्विति । एतदतिरिच्य तत् काले प्रचलितानां सांस्कृतिकपरम्परा, अभिषेक-मङ्गलवाद्य-गीतम्-यज्ञोत्सवा इत्येते सर्वे राष्ट्रियैकतायाः प्रतीकभुताः भवन्ति । एकेनैव कथासूत्रेण अयोध्या-किष्किन्धा-लङ्का इत्येताः नगर्यः भारतीयराष्ट्रियैकतायाः प्रत्यक्षप्रमाणस्वरुपाः भवन्ति । एतद् व्यतिरिच्य उत्तरभारततः दक्षिणभारतपर्यन्तं दक्षिणभारतपर्यन्तं प्रायः सर्वासु एव भाषासु रामसम्बन्धितस्य रामायणस्य रचना संजाता । अनेन भारतीयसंस्कृतेः एकतायाश्च अभिवृद्धिः सञ्जाता।

**राजनैतिकसाम्यता**

राजनैतिकैकता एव राष्ट्रियैकतायाः सर्वाधिका सशक्ततत्त्वस्वरूपा भवति । राष्ट्रियतायाः अनुभूतये राजनैतिकैकतायाः अनुपमं योगदान वर्तते । रामचन्द्र अग्रवाल (Ramachandra Agarwal) महोदयस्य इदमेव कथनं यत् - यद्यपि कस्यापि देशस्य निवासेषु भाषा, धर्मः, जातिभेदः, वेषभूषा इत्यादिषु प्रभेदः परिलक्ष्यते किन्तु ते एकस्येव सर्वकारस्यधीने भवन्ति तथापि इयमेकता स्वतः उत्पद्यते । राजनैतिकैकता सुरक्षाकवचस्वरूपा भवति । वाल्मीकिरामायणे विवारणामेकं यथा देशे सङ्कटः आयाति एवञ्च दण्डकारण्यस्य मुनयः यदा राक्षसैः पीडिताऽसन् । तदा ते मर्यादापुरुषोत्तमं राममित्थं प्रार्थयामासुः-

राक्षसैर्दण्डकारण्ये बहुभिः कामरुपिभिः ।
आर्द्दिताः स्म भृशं राम भवान् नस्तत्र रक्षतु ॥
(वा. रा 3/10/11)

**राष्ट्रभक्तिः**

यदि मानवः स्वस्य स्वार्थकारणात् सद्गुणान्न पालयति केवलं स्वकीयाय हिताय प्रवर्तते समस्ताविवेककार्यं कर्तुमिच्छति तर्हि

अनेन जनेन निर्मितसमाजः राष्ट्रजीवनञ्च विश्वे ऊर्ध्वस्थानं प्राप्तुं न शक्ष्यति । विश्वे इदं च राष्ट्रं वन्दनीयं भवितुं न प्रभवति । अस्माद्धेतोः महर्षिवाल्मीकिः रामद्वारा एतादृशमेकं वातावरणं निर्मितवान् येन साधारणमनुष्योऽपि सद्गुणामां प्रेरणाप्राप्तुं शक्नुयात् । समाजे एकात्मकताचारित्रिकराष्ट्रभावानुशासनयुक्तशक्तीनामाविष्कारार्थ-मेतादृशमेकं प्रयासं विहितवान । येन राष्ट्रं वैभवपूर्णं भविष्यति, तथा तद्राष्ट्रस्य रक्षापि सम्भविष्यति । एतेषां मौलिकविषयानामाग्रहः दृढतापूर्वकं कुर्यात् । वाल्मीकिः दशरथ-राम-सुग्रीव-हनुमत्-गुह्यकः अङ्गदादीनामनेकेषां प्रधानऽपात्रणां राष्ट्रभक्तिं प्रादर्शयत् ।

हनुमता दशरथस्य तेजस्वी, प्रजापालकः, लोकबन्धुः इत्येतानि विशेषणानि प्रयुक्तानि । एत्यान्येव विशेषणानि तद्राष्ट्रस्य प्रतीकभूतानि भवन्ति ।

> राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
> पितेव वायुलोकस्य सुरेश्वरसमद्युतिः ।।
> (वा. रा 1/70/42)

**प्रधानविषयः**

यदि मानवः स्वस्य स्वार्थकारणात् सद्गुणान्न पालयति केवलं स्वकीयाय हिताय प्रवर्तते समस्ताविवेककार्यं कर्तुमिच्छति तर्हि अनेन जनेन निर्मितसमाजः राष्ट्रजीवनञ्च विश्वे ऊर्ध्वस्थानं प्राप्तुं न शक्ष्यति । विश्वे इदं च राष्ट्रं वन्दनीयं भवितुं न प्रभवति । अस्माद्धेतोः महर्षिवाल्मीकिः रामद्वारा एतादृशमेकं वातावरणं निर्मितवान् येन साधारणमनुष्योऽपि सद्गुणामां प्रेरणां प्राप्तुं शक्नुयात् । समाजे एकात्मकताचारित्रिकराष्ट्रभावानुशासनयुक्तशक्तीनामाविष्कारार्थ-मेतादृशमेकं प्रयासं विहितवान् । येन राष्ट्रं वैभवपूर्णं भविष्यति, तथा तद्राष्ट्रस्य रक्षापि सम्भविष्यति । एतेषां मौलिकविषयानामाग्रहः दृढतापूर्वकं कुर्यात् । वाल्मीकिः दशरथ-राम-सुग्रीव-हनुमत्-गुह्यकः अङ्गदादीनामनेकेषां प्रधानऽपात्रणां राष्ट्रभक्तिं प्रादर्शयत् ।

**उपसंहारः**

एवं प्रकारेण रामायणकाले रामस्य आध्वर्यवे राष्ट्रविषयकविचाराणां विषये वाल्मिकिना रचितं रामायणम् इत्यस्य ग्रन्थे राष्ट्रसमृद्धिविचारः राष्ट्रतत्त्वानां विचारः राष्ट्रियैकताविचारः च विषये रामायणग्रन्थे विभक्ताः काण्डेषु राष्ट्रविषयकविचारस्य सन्दर्भेषु कीदृशं राष्ट्रं भवेत् तथैव राष्ट्रनायकस्य दायित्वस्य किं, तस्य व्यवहारः कीदृशः भवेत्, इत्यस्मिन् विषये ग्रन्थे उपलभ्यते । एवञ्च राष्ट्रसमृद्ध्यर्थं राष्ट्रतत्त्वानानि बहु प्राधान्येन उपकुर्वन्ति । इत्यतः तस्मिन् विषये मया किञ्चित् अत्र उपस्थापितम् ।

**ग्रन्थाः -**

1. रामायणम् आदिकविः महर्षि वाल्मिकि । गीताप्रेस, गोरखपुर । सं द्वितीया 1967.